# संस्कृतवार्ता:

दिनाङ्क: - 06.12.2024 सायम् - 06:20

मुख्यवार्ताः

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदेहल्याम् भारतमण्डपम् इत्यत्र अष्टलक्ष्मीमहोत्सवस्य उद्घाटनम् कृतम्।
- विपक्षस्य कोलाहलं आलक्ष्य संसद: उभयो: सदनयो: कार्याचरणम् अद्य स्थगितम् अभवत्।
- महापरिनिर्वाण-दिवसावसरे अद्य भारतीय-संविधानस्य मुख्यनिर्मातु: डॉ.बी.आर. अम्बेडकर-महोदयाय देशेन श्रद्धाञ्जलि: समर्पिता।
- राष्ट्रपतिपदासीना द्रौपदी मुर्मूः इत्येषा प्रोक्तवती यत् शिक्षैव मनुष्यस्य सर्वांगीणविकासस्य एकमात्रं मार्गः वर्तते।
- पुरुषक्रिकेट-नवदशवयोवर्गीय-एशियाचषक-स्पर्धायां अद्य भारतेन उपान्त्यचक्रे श्रीलंकादलं सप्तस्तोभैः पराजितम्।

प्रधानमन्त्री-अष्टलक्ष्मी महोत्सव

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याम् भारतमण्डपम् इत्यत्र अष्टलक्ष्मीमहोत्सवस्य उद्घाटनम् कृतम्। त्रिदिवसीयः उत्सवः पूर्वोत्तरभारतस्य विशालसांस्कृतिकचित्रं प्रकाशयति, पारम्परिककलाः, शिल्पकलाः, सांस्कृतिकप्रथाः च संयोजयति। महोत्सवः अस्य प्रदेशस्य जीवन्त-वस्त्र-उद्यमस्य, शिल्पकलायाः, पर्यटन-अवसराणां, पूर्वोत्तरस्य अष्टसु राज्यानां अद्वितीय-उत्पादानां च प्रकाशनार्थं असाधारण-मञ्चरूपेण कार्यं करिष्यति। अस्य प्रदेशस्य विंशत्यधिक-त्रिशतं कृषकाणां शिल्पिनां च उत्पादानां कलानां च प्रदर्शनं कुर्वद् ग्रामीण-आपणम् एव बृहत्तमम् आकर्षणम् भविष्यति। अस्मिन् कार्यक्रमे पूर्वोत्तरभारतस्य प्रसिद्धानां मुगा एंड एरी सिल्क् इत्येतयोः कृते समर्पितानि मण्डपानि, शिल्पकलानां प्रत्यक्षप्रदर्शनानि, क्षेत्रस्य भौगोलिक-सूचक-उत्पादानाम् विषये च विशेषम् अवधानं च भविष्यति। महोत्सवः अस्य जीवन्त-प्रगतिं प्रदर्शयितुं महत्त्वपूर्ण-क्षणरूपेण कार्यं करिष्यति, पूर्वोत्तरभारतस्य सांस्कृतिकसमृद्धेः उत्सवम् आचरति तथा च तस्य निरन्तरवृद्धेः विकासस्य च समर्थनाय नूतनाः निवेशान् आमन्त्रयिष्यति। अस्मिन् उत्सवे शिल्पकला-प्रदर्शनानि, ग्रामीण-हाटस्, राज्य-विशिष्ट-मण्डपानि, पूर्वोत्तर-क्षेत्रस्य विकासाय महत्त्वपूर्ण-प्रमुख-क्षेत्राणां विषये तान्त्रिक-सत्राणि च भवन्ति।

संसद-स्थगनम्

संसद: उभयो: सदनयो: कार्याचरणम् अद्य स्थगितम् अभवत्। विभिन्न-प्रकरणेषु सत्तापक्षस्य कोलाहलानन्तरं राज्यसभाया: कार्याचरणं स्थगितम्। अपरत्र भाजपा-सांसदेन निशिकान्त-दुबे इत्यमुना कांग्रेस-नेतॄन् विरुध्य आक्षेपित-आरोपान् आलक्ष्य विपक्षिसदस्यानां विरोधकारणात् लोकसभाया: अपि कार्याचरणं स्थगितम् अभवत्। मध्याह्न-भोजनानन्तरं यदा उच्चसदनस्य कार्याचरणं समारब्धं तदा सत्तापक्षीय-सदस्यै: अभिषेक-मनु-सिंघवी इत्यस्य आसनात् धनराशि-प्रापण-सन्दर्भे कोलाहलं कृतम्। निरन्तरं कोलाहलं अवलोक्य सदनस्य कार्याचरणं स्थगितम्। इत: पूर्वम् अद्य प्रात: यदा सदनस्य कार्यजातं समारब्धम् तदा जगदीप-धनखड़ेन विज्ञापितं यत् कार्याचरणस्य स्थगनान्तरं अन्वेषणावधौ राज्यसभा-कक्षात् धनराशे: समुच्चय: सम्प्राप्त:। तेनोदीरितं यत् श्रीसिंघवी इत्यस्य आसनात् सुरक्षाकर्मिभि: धनराशि: स्वायत्तीकृता। अस्मिन् सन्दर्भे अन्वेषणं जायमानम् अस्ति। श्रीखड्गे इत्यमुना प्रोक्तं यत् अन्वेषणानन्तरमेव अस्मिन् विषये किमपि वक्तुं शक्यते। अस्मिन् विषये केन्द्रिय-मन्त्रिणा जे.पी.नड्डा इत्यमुना कथितं यत् एषा काचित् अभूतपूर्व घटना वर्तते। अपि च एतस्या: कठोरनिन्दा भवेत्।

महापरिनिर्वाण-दिवस:

महापरिनिर्वाण-दिवसावसरे अद्य भारतीय-संविधानस्य मुख्यनिर्मातु: डॉ.बी.आर. अम्बेडकर-महोदयाय देशेन श्रद्धाञ्जलि: समर्पिता। अस्मिन् पवित्रदिने देश: बाबासाहेब-अम्बेडकर-महोदयं तस्य शिक्षायै तथैव न्यायपूर्ण-समावेशी-समाजस्य निर्माणाय श्रद्धाञ्जलिं समर्पयति। राष्ट्रनिर्माणे डॉ. अम्बेडकर महोदयस्य योगदानं प्रकशयितुं अशेषे हि देशे बहव: कार्यक्रमा: समायोजिता। उपराष्ट्रपति: जगदीपधनखड:, प्रधानमन्त्री नरेन्द्रमोदी, लोकसभाध्यक्ष: ओम बिरला इत्येते नवदिल्ल्यां संसदभवन-परिसरे डॉ. अम्बेडकर-महोदयं पुष्पाञ्जलिं समर्पितवन्त:। पूर्व-राष्ट्रपति: रामनाथ कोविंद:, कांग्रेस-अध्यक्ष: मल्लिकार्जुन खडगे, अन्ये च गणमान्या: प्रेरणास्थले तस्मै पुष्पाञ्जलिं अर्पितवन्त:। अस्य वर्षस्य समारम्भे मुम्बईय्यां चैत्यभूमे: स्वीययात्राया: चित्रं प्रदर्शनयन् प्रधानमन्त्रिणा नरेन्द्रमोदिना डॉ. अम्बेडकर-महोदय: सामाजिक-न्यायस्य प्रतीकत्वेन वन्दित:। श्रीमोदिना सबलं प्रोक्तं यत् डॉ. अम्बेडकर-महोदयस्य सम्मानेन सह देश: स्वप्नान् पूरयितुं स्वीयप्रतिबद्धताम् अपि प्रकटीकरोति।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

गुरु तेग बहादुर

श्रीगुरु तेग बहादुर-वर्यस्य नवचत्वारिंशदधिक त्रिशततमः बलिदानदिवसः सम्पूर्णे भारते विदेशेषु च महत्-भक्त्या आचर्यते। भक्ताः नवम-गुरुवे , श्रीगुरु तेगबहादुराय गुरुद्वारायाः 'गुरु का महल' इत्यत्र, अमृतसर्-नगरस्य हरमन्दिरसाहिब् इत्यत्र च अन्येषु स्थानेषु श्रद्धाञ्जलिम् अर्पयन्तः सन्ति, गुरुबानी, श्री अकाल-तख्तसाहिब इत्यस्य जत्थेदारः, श्री हरमन्दिरसाहिब् इत्यस्य हेडग्रन्थिः इति च श्रुतवन्तः। ज्ञानी रघबीरसिंह: जनसमूहं तथा सामान्यजनान् श्रीगुरु तेगबहादुरस्य जीवनात् पाठान् ग्रहीतुं आवाहयत्।

राष्ट्रपति-ओडिशायात्रा

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः इत्येषा प्रोक्तवती यत् शिक्षैव मनुष्यस्य सर्वांगीणविकासस्य एकमात्रं मार्गः वर्तते। तया प्रोक्तं यत् आजीविका प्राप्तिरेव शिक्षायाः एकमात्रं उद्देश्यं न भवेत्। सा उक्तवती यत् छात्रेभ्यः शिक्षायाः माध्यमेन व्यापकज्ञानं प्रदातव्यम्। राष्ट्रपतिना मयूरभंजस्य उपरबेड़ा-सर्वकारीय-उच्च- प्राथमिक-विद्यालयस्य छात्रान् सम्बोधयन्त्या एवमुदीरितम् ।अस्मिन् जनपदे तया षड्दशकात् पूर्वं अध्ययनं कृतमासीत्। राष्ट्रपति द्रौपदीमुर्मूः देशस्य प्रथमनागरिकत्त्वेन पदमवाप्य अद्य स्वीये पैतृकग्रामे उपरबेड़ायां प्रथमवारं समागता। उपरबेड़ाग्रामः स्वसमुदायस्य अतीवप्रसिद्धायाः कन्यायाः हर्षोल्लासेन स्वागतम् अकरोत्।

महाराष्ट्र-भाजपाविधायक शपथग्रहणम्

भारतीयजनता-पार्टीति दलस्य विधायकेन कालिदास कोलम्बकर इत्यमुना अद्य महाराष्ट्रविधानसभायाः प्रोटेम-स्पीकर-रुपेण शपथग्रहणम् कृतम्। राधाकृष्णनेन मुख्यमन्त्री देवेन्द्र फडणवीस इत्यस्य , विधान-परिषद: उपसभापतिः डॉ. नीलम गोरहे इत्यस्याः तथैव अन्येषां गणमान्यानां उपस्थितौ मुंबय्याः राजभवने श्री कोलाम्बकर महोदयं पदस्य गोपनीयतायाः च शपथवचनं प्रदापितम्। श्री कोलम्बकर महाराष्ट्र-विधानमण्डलस्य विशेषसत्रस्य अध्यक्षतां करिष्यति, एतत्तु दिसम्बरमासस्य सप्तमदिनांकात् आरभ्य दिसम्बरमासस्य नवमदिनांके समाप्तिम् एष्यति ।

पंजाब-कृषकाः

पंजाबराज्यस्य कृषकानां कश्चन समूहः दिल्लीं प्रत्यागच्छन् अस्ति। बह्व्यः लम्बितयाचनाः आधारीकृत्य अयं समूहः 'दिल्ली चलो' इति आन्दोलनान्तर्गतं शंभूसीम्नः पदयात्रां कुर्वन् वर्तते। आरक्षिदलेन कृषकाः तत्रैव स्थगिताः। कृषकानां-प्रदर्शनम् आलक्ष्य

